दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लपूर्णिमा
आषाढः 15 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-247 | 1 | जून 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 दुर्गमतर-क्षेत्रे 'बड़ा भङ्गाल' इत्यस्मिन् त्रातारूपेण प्राप्तः सुक्खूः, १५ वर्षेभ्यः परं कश्चित् मुख्यमन्त्रिणं दृष्ट्वा प्रसन्नाः ग्रामीणाः

3 'चिट्टा' मादकद्रव्य-तस्कराणां ७० लक्षरूप्यकाणां सम्पत्तिः कुण्ठिता

4 यूरोप-महाद्वीपे अपि ग्रीष्मकालस्य हाहाकारः, फ्रान्स-देशे १००० जनानां मृत्युः; ब्रिटेन-जर्मनी-सदृशाः देशाः अपि तप्यन्ते

## देहल्यां स्थितः केन्द्रीय-संस्कृत-विश्वविद्यालयः 'आर्टिफिशियल इन्टेलिजेन्स' (कृत्रिमबुद्धिमत्ता) तथा 'डेटा साइन्स' इत्यादिषु आधुनिक-विषयेषु बी.टैक पाठ्यक्रमस्य शुभारम्भं विदधाति - प्रधानमन्त्री



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी सविशेषं प्रत्यपादयत् यत् भारतेन जून-मासे वैमानिकी-क्षेत्रे एका महती सफलता अर्जिता, यत्र स्वदेशनिर्मितस्य 'मेक इन इण्डिया' सी-295 सैन्य-परिवहन-विमानस्य प्रथमं परीक्षण-उड्डयनं सफलतापूर्वकं सम्पन्नम्। आकाशवाण्याः 'मन की बात' कार्यक्रमे जनान् सम्बोधयन् प्रधानमन्त्रिणा इयं सूचना प्रख्यापिता यत् सम्प्रति एतादृशानि चत्वारिंशत् विमानानि भारतदेशे एव विनिर्मियन्ते। श्रीमोदिना गदितं यत् देशे अन्ये केचन महत्वपूर्णाः प्रयासाः विधीयन्ते। अस्मिनैव क्रमे देहल्यां स्थितः केन्द्रीय-संस्कृत-विश्वविद्यालयः 'आर्टिफिशियल इन्टेलिजेन्स' (कृत्रिमबुद्धिमत्ता) तथा 'डेटा साइन्स' इत्यादिषु आधुनिक-विषयेषु बी.टैक पाठ्यक्रमस्य शुभारम्भं विदधाति ।प्रधानमन्त्री मोदी सहर्ष न्यगादीत् यत् अद्य भारतीयसंस्कृतिः विश्वस्मिन् हि विश्वे प्रसरति। प्रधानमन्त्री नरेन्द्रमोदी गौरवान्वितः अस्ति यत् भारतेन अस्मिन् मासे देशस्य सुरक्षायाः आत्मनिर्भरतायाः च क्षेत्रे महती सफलता अर्जिता। सः कोलकाता-नगरे आयोजितम् एकं नौसेना-सम्बन्धि-कार्यक्रमं सम्बोधितवान्, यत्र 'आईएनएस दुनागिरि' 'आईएनएस संशोधक' तथा 'आईएनएस अग्रयश' भारतीय नौसेनायाः क्षेत्रे समाविष्टाः। प्रधानमन्त्रिणा प्रतिपादितं यत् भारतं समुद्रतः आकाशपर्यन्तं उत्तरोत्तरं सुरक्षितं तथा च आत्मनिर्भरं भवति। प्रधानमन्त्रिणा अन्ताराष्ट्रिय-योगदिवसस्य अपि उल्लेखो विहितः। तेन अहमदाबाद-नगरे आयोजितायाः 'विश्व-योगासन-विजेतृ-प्रतियोगितायाः' विषये कथितं यत्- अस्यां भारतेन द्व्यधिकैकशत सुवर्णपदकैः सह आहत्य चतुर्दशोत्तरैकशतपदकानि विजितानि। प्रधानमन्त्रिणा मोदिना प्रतिपादितं यत् राष्ट्रनिर्माणे 'जनसहभागितायाः शक्तिः भारतस्य कृते एका महती सम्पत्तिः अस्ति। अस्मिन् मन की बात संस्करणे प्रधानमन्त्री नरेन्द्रमोदी 'अन्धविश्वास' इति गभीर-विषयं अपि स्पृष्टीकृतवान् । अनेन सहैव, श्रीमोदिना उक्तं यत् आगामी-गणेशोत्सवाय 'गणपतिबाप्पा' भगवतः प्रतिमा अनिवार्यरूपेण अस्यैव देशस्य मृत्तिकायाः भवेत्, सा च स्थानीय-कुम्भकारैः शिल्पिभिः विनिर्मिता स्यात्। तेन मूर्तिनिर्मातारः अपि अनुरुद्धाः यत् ते मृण्मय-मूर्तिनां निर्माणाय एव प्राथमिकतां दद्युः। स्वीय-सम्बोधनस्य चरमे सोपाने प्रधानमन्त्रिणा जलसंरक्षणस्य विषये च बलं प्रदत्तम्। तेन कथितं यत् वर्षाजलस्य एकैकोपि बिन्दुः संरक्षणीयः अस्ति। श्रीमोदिना विशेषरूपेण गदितं यत् जलसंरक्षणार्थं 'कैच द रेन' अभियानस्य वेगः मन्दो न भवेत्।

## सुभाषितम्

**अनाहूत: प्रविशति**
**अपृष्टो बहु भाषते।**
**अविश्वस्ते विश्वसिति**
**मूढचेता नराधम:॥**

अर्थात्- जो व्यक्ति बिना आज्ञा लिए किसी के भी कक्ष में प्रवेश करता है, परामर्श माँगे बिना अपनी बात थोपता है तथा अविश्वसनीय व्यक्ति पर विश्वास करता है वह मूर्ख कहलाता है।




## पश्चिम-एशिया' देशे सुरक्षा-स्थितिः पुनरपि गभीरा जाता



पश्चिम-एशियाक्षेत्रे सुरक्षा-स्थितिः पुनरपि गभीरा जाता। अमेरिका-ईरान-देशयोर्मध्ये विद्यमानः युद्धविरामः खण्डितः, गतकतिपयहोरासु च उभयपक्षाभ्यां परस्परं नूतनानि सैन्याक्रमणानि कृतानि। तेहरानेन वाणिज्यिक तैलवाहकपोतस्य उपरि ड्रोणाक्रमणं विहितमिति आरोपं कृत्वा, अमेरिकया होर्मुज-जलसन्धेः समीपे स्थितेषु दशसु ईरानी-सैन्यस्थानकेषु वायुप्रहाराः कृताः। अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड ट्रम्प अवदत् यत्, युद्धविरामस्य पुनरपि उल्लङ्घने सति अत्यन्तं व्यापकं सैन्यप्रत्युत्तरं प्रदास्यते। प्रत्युत्तररूपेण ईरान देशेन अल्पकालानन्तरमेव कुवैत-बहरीन-देशयोः स्थितानि अमेरिकी सैन्यस्थानानि लक्ष्यीकृत्य क्षेपणास्त्रैः ड्रोणैश्च आक्रमणानि कृतानि।

## भारत-सेशल्स-देशयोः मध्ये स्वास्थ्यं, कृषिः, वित्तं समेत्य अन्तरिक्षादि विविध-विषयेषु महत्वपूर्ण-सहमति-पत्रेषु हस्ताक्षराणि अभवन्





प्रधानमन्त्री नरेन्द्रमोदी सेशल्स-देशस्य राष्ट्रपतिः पैट्रिक हर्मिनी च 'विक्टोरिया' नगरे द्विपक्षीय वार्ताम् अकुरुताम्। उभौ नेतारौ द्विपक्षीय-सहयोगस्य सम्पूर्ण-क्षेत्राणां समीक्षां कृतवन्तौ सहैव पारस्परिक हितस्य क्षेत्रीय-अन्ताराष्ट्रिय-विषयेषु च स्वस्व मनोगतं विनीमयी कृतवन्तौ। तस्मात् पूर्वं, सेशल्स-देशेन प्रधानमन्त्रिणे नरेन्द्रमोदिने पर्यावरण-नेतृत्वस्य सर्वोच्च सम्मानः 'गार्डियन ऑफ द ब्लू होरिजन' प्रदत्तः। संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी अवोचत् यत् "अयं गार्डियन ऑफ द ब्लू होरिजन' सम्मानः मम कृते अथ भारतस्य नागरिकाणां कृते परम-गौरवस्य विषयो वर्तते। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् "द्वयोः देशयोः दूरत्वं न्यूनीकर्तुं डिजिटल प्रौद्योगिकी प्रभावपूर्णं माध्यमं वर्तते।" तेन एतदर्थं प्रसन्नता प्रदर्शिता यत् अद्य सेशल्स-देशे भारतस्य 'यूपीआई' तन्त्रस्य प्रवर्तनाय एकस्मिन् सहमति-पत्रे हस्ताक्षरं क्रियमाणं अस्ति। वार्ताहरैः सह भाषमाणः सेशल्स-देशस्य राष्ट्रपतिना प्रतिपादितं यत् उभयोः देशयोः मध्ये वार्ता व्यापिका भविष्योन्मुखी च आसीत्, या सेशल्स-भारतयोः प्रगाढ-मैत्री-सम्बन्धान् पारस्परिक विश्वासं च प्रकटीकरोति।निर्धारित-कार्यक्रमानुसारं प्रधानमन्त्री नरेन्द्रमोदी सेशल्स-देशस्य राष्ट्रिय सभां सम्बोधितवान् सहैव तत्रत्य भारतीय-प्रवासिभिः सह संवादं कृतवान्। तदनन्तरं, सः सेशल्स-देशस्य राष्ट्रिय-दिवसस्य सुवर्णजयन्ती-समारोहे 'मुख्य अतिथित्वेन भागं ग्रहीतवान्।

## सर्वेषां आवश्यकानां यात्रा-पत्राणां विना 'कैलास-मानसरोवर-यात्रां' न क्रियताम् - विदेशमन्त्रालयः



विदेशमन्त्रालयेन भारतीयनागरिकाः परामृष्टाः यत् सम्पूर्णयात्रायाः कृते आवश्यकानि सर्वाणि यात्रापत्राणि विना कैलाशमानसरोवरयात्रा न क्रियताम्। केचन भारतीयतीर्थ-यात्रिणः नेपाले अवरुद्धाः अभवन् सहैव साहाय्यार्थं प्रार्थितवन्तः। एताम् घटनाम् उद्दिश्य विदेशमन्त्रालयेन एषः परामर्शः प्रख्यापितः।

# दुर्गमतर-क्षेत्रे 'बड़ा भङ्गाल' इत्यस्मिन् त्रातारूपेण प्राप्तः सुक्खूः, १५ वर्षेभ्यः परं कश्चित् मुख्यमन्त्रिणं दृष्ट्वा प्रसन्नाः ग्रामीणाः





हिमसंस्कृतवार्ताः — काङ्गड़ा ।प्रायः पञ्चदशवर्षाणां (१५ वर्षाणाम्) सुदीर्घान्तरालस्य परं हिमाचलप्रदेशस्य मुख्यमंत्रिणं स्वमध्ये प्राप्य न केवलं काँगड़ामण्डलस्य अपितु प्रदेशस्य दुर्गमतरस्य कठिनतमस्य च क्षेत्रस्य 'बड़ा भङ्गाल' इत्यस्य जनाः हर्षेण प्रफुल्लिताः अभवन्। विशेषतः तेषां यूनां प्रसन्नतायाः सीमा नासीत् यैः सद्यः एव बाल्यकालस्य देहली उल्लङ्घिता, प्रथमवारं च कस्यचित् मुख्यमन्त्रिणः दर्शनस्य स्वप्नः पूर्णः जातः। प्रायः सार्धैकदशकात् (१.५ दशकात्) परं कश्चित् मुख्यमन्त्री न केवलं 'बड़ा भङ्गाल' क्षेत्रस्य प्रवासं कृतवान्, अपितु सुखविन्दरसिंहसुक्खूः सम्पूर्णं रात्रिं स्थानीयजनैः सह व्यतीत्य कञ्चित् नूतनं कीर्तिमानम् अपि प्रस्थापितवान्।

एषः प्रथमोऽवसरः नास्ति यदा सुक्खूः दुर्गमक्षेत्रं प्राप्य जनानां सुख-दुःखानि विभक्तवान्। 'सर्वकारः ग्रामस्य द्वारे' इति कार्यक्रमस्य नूतनचिन्तनेन सह सः निरन्तरं तादृशेषु कठिनेषु क्षेत्रेषु रात्रौ तिष्ठति, यत्र प्रायः कोऽपि नेता गन्तुं रुचिं न दर्शयति। एतस्मात् पूर्वं तेन शिमला मण्डलस्य 'डोडरा-क्वार' तथा 'कुपवी', कुल्लू मण्डलस्य 'बागा सराहन' समेतानां जनजातीयमण्डलानां लाहौल-स्पित्याः किन्नौरस्य च दूरस्थग्रामाणां प्रवासं कृत्वा तत्रत्यानां जनानां मध्ये रात्रिवासं विहितं तेषां समस्यानां कठिनतानां च निवारणम् अपि कृतम्।

मुख्यमन्त्रिणं स्वमध्ये प्राप्य 'बड़ा भङ्गाल' क्षेत्रस्य जनेषु उत्सवमयो वातावरणः आसीत्। स्थानीयनिवासिभिः मुख्यमन्त्रिणः आभारः प्रकटितः यत् वर्ष २०११ तः परं प्रथमवारं कश्चित् मुख्यमन्त्री 'बड़ा भङ्गाल' क्षेत्रस्य प्रवासं कृत्वा तेषां वार्तां पृष्टवान्। क्षेत्रे प्रथमवारं कस्यचित् मुख्यमन्त्रिणः रात्रिप्रवासेन स्थानीयलोकाः अतीव उत्साहिताः आसन्, तैश्च विश्वासः प्रकटितः यत् मुख्यमन्त्रिणः घोषणाभिः प्रशासनाय दत्तनिर्देशैश्च 'बड़ा भङ्गाल' क्षेत्रस्य विकासाय नूतनः आयामः प्राप्स्यति। 'बड़ा भङ्गाल' प्रवासकाले मुख्यमन्त्री पूर्णरूपेण स्थानीयसंस्कृतौ परम्परासु च रञ्जितः अदृश्यत। तेन पारम्परिकवेषभूषा 'चोला-डोरा' धृत्वा सांस्कृतिककार्यक्रमेषु भागः गृहीतः तथा स्थानीयजनैः सह पारम्परिकलोकनृत्ये अपि सहभागिता कृता।

मुख्यमन्त्रिणः स्थानीयकृषकाणां क्षेत्राणां भ्रमणं कृत्वा तेषां समस्याः निकटात् ज्ञाताः। तेन कृषकैः सह राजमाषस्य (राजमाह) कृषेः, उत्पादनस्य, विपणनस्य (मार्केटिंग) च सम्बद्धानां विषयाणाम् उपरि विस्तरेण चर्चा कृता, मेषपालकानां समस्याः अपि श्रुताः। तेन कथितं यत् राज्यसर्वकारः सम्पूर्णप्रदेशे प्राकृतिककृषिं प्रोत्साहयति, कृषकेभ्यः च तेषाम् उपजस्य उचितमूल्यं सुनिश्चितं कर्तुं न्यूनतमसमर्थनमूल्यं प्रापयति। तेन प्रख्यापितं यत् सर्वकारेण ऊर्णस्य (ऊन का) समर्थनमूल्यं १०० रूप्यकाणि प्रतिकिलोग्रामं निर्धारितं, येन मेषपालकाः स्थानीयकृषकाश्च लाभान्विताः भविष्यन्ति। 'बड़ा भङ्गाल' क्षेत्रस्य जनाः अपि सर्वकारस्य अस्याः योजनायाः लाभं ग्रहीतुं शक्नुवन्ति।मुख्यमन्त्रिणा प्रतिपादितं यत् प्राकृतिककृषिं प्रोत्साहितुं राज्यसर्वकारेण 'राजीव गांधी प्राकृतिक खेती स्टार्ट-अप योजना' प्रवर्तिता अस्ति। अस्याः अन्तर्गतं प्राकृतिककृष्या उत्पादितस्य गोधूमस्य न्यूनतमसमर्थनमूल्यं ६० रूप्यकेभ्यः वर्धयित्वा ८० रूप्यकाणि प्रतिप्रतिकिलोग्रामं, मक्की (मक्का) इत्यस्य ४० रूप्यकेभ्यः वर्धयित्वा ५० रूप्यकाणि प्रतिप्रतिकिलोग्रामं तथा पाङ्गीघात्यां उत्पादितस्य यवस्य (जौ) समर्थनमूल्यं ६० रूप्यकेभ्यः वर्धयित्वा ८० रूप्यकाणि प्रतिप्रतिकिलोग्रामं कृतम् अस्ति। एतदतिरिच्य, हरिद्रायाः (हल्दी) न्यूनतमसमर्थनमूल्यं ९० रूप्यकेभ्यः वर्धयित्वा १५० रूप्यकाणि प्रतिप्रतिकिलोग्रामं विहितं, यत्रैव आर्द्रकस्य (अदरक) कृते ३० रूप्यकाणि प्रतिप्रतिकिलोग्रामं समर्थनमूल्यं निर्धारितं वर्तते। अस्मिन् अवसरे स्थानीयविधायकः किशोरीलालः, उपायुक्तः हेमराजबैरवा तथा आरक्षक-अधीक्षकः (SP) कुलभूषणवर्मा समेताः अन्ये गणमान्याः अपि उपस्थिताः आसन्।

# श्रद्धालूनां कृते आवश्यकी वार्ता: किन्नौर-कैलाश-यात्रा अधुना स्थगिता

हिमसंस्कृतवार्ताः — किन्नौरः। तीर्थयात्रिणां सुरक्षां सर्वोपरि-प्राथमिकतां मत्वा मण्डलप्रशासनेन किन्नौर-कैलाश-यात्रा २०२६ आगाम्यादेशं यावत् स्थगिता। यात्राशृङ्खलायां हिमनदानां (ग्लेशियर), अस्थिरशैलानां, भूस्खलनस्य च वर्धमानं सङ्कटं दृष्ट्वा एषः निर्णयः गृहीतः। प्रशासनेन अयं निर्णयः विशेष-अन्वेषणचमोः (टोही दल) प्रतिवेदनस्य आधारेण विहितः।

## मन्त्रिणः उपवेशनोत्तरं कृतं मार्गस्य निरीक्षणम्

१२ जून् दिनाङ्के राजस्व-उद्यानकृषि-जनजातीयविकास-जनशिकायतनिवारणमन्त्रिणः जगत्सिंहनेगिनः अध्यक्षतायाम् आयोजिते उच्चस्तरीय-उपवेशने यात्राशृङ्खलायाः सुरक्षायाः समीक्षा कृता आसीत्। उपवेशनोत्तरं मार्गस्य स्थितेः आकलनं कर्तुं वनविभागस्य स्थानीयप्रशासनस्य च निरीक्षणे कस्याश्चित् विशेष-अन्वेषणदलस्य सङ्घटनम् विहितम्। दलेन २१ जून् दिनाङ्के यात्राशृङ्खलायाः विस्तृतं निरीक्षणं कृतम्।

## अन्वेषणदलेन सूचिताः बहवः गम्भीराः सङ्कटाः

प्रतिवेदनानुसारं 'मिलिंग खाटा' स्थानात् शिवलिंगं यावत् बृहन्तः हिमनदाः (ग्लेशियर) तेषाम् उपरि च अस्थिरशैलाः विद्यन्ते। गुफायाः सोरङ्ग-क्षेत्रस्य मध्ये बहुषु स्थानेषु शैलानां पतनेन मार्गः बाधितः असुरक्षितश्च जातः अस्ति। निरन्तरं वर्धमानेन तापमानेन हिमः तीव्रगत्या विलीनः (पिघल) भवति, येन भूस्खलनस्य शैलपतनस्य च भयं भूयः प्रवृद्धम्। 'मिलिंग खाटा' स्थानात् पवित्रगुफां यावत् सम्पूर्णः मार्गः अत्यधिक-जोखिमयुक्तः मन्यते।

## सुरक्षां वीक्ष्य यात्रायां प्रतिबन्धः

प्रशासनस्य कथनं वर्तते यत् वर्तमानपरिस्थितिसु यात्रायाः आरम्भः श्रद्धालूनां रक्षकदलानां च कृते सङ्कटपूर्णः भवितुं शक्नोति। अतः यात्रा आगाम्यादेशं यावत् स्थगिता वर्तते। मार्गस्य सुरक्षितघोषणायाः परमेव यात्राप्रारम्भस्य उपरि निर्णयः ग्रहीष्यते।

## श्रद्धालुभ्यः प्रार्थना

उपायुक्तेन डॉ. अमितकुमारशर्मणा श्रद्धालवः प्रार्थिताः यत् ते स्वसुरक्षां ध्यात्वा आगाम्यादेशं यावत् किन्नौर-कैलाश-यात्रां प्रति न गच्छेयुः, प्रशासनस्य च निर्देशाणाम् अनुपालनं कुर्युः।

# बीपीएल-सूच्यां प्रवेशाय पञ्चम-जुलाई-पर्यन्तम् आवेदनम्, १५ जुलाई-दिनाङ्के सूची प्रकाशिता भविष्यति, एतेभ्यः परिवारेभ्यः लाभः न



हिमाचलप्रदेशसर्वकारस्य ग्रामीणविकासविभागेन बीपीएल-परिवाराणां चयनाय अष्टमचरणस्य प्रक्रियायाः आरम्भविषये नवीनाः मार्गदर्शिकाः निर्गताः। आदेशानुसारम् अष्टमचरणान्तर्गतम् आवेदनप्राप्तेः, सत्यापनस्य, अनुशंसायाः च प्रक्रिया पञ्चम-जुलाई-पर्यन्तं पूर्णा भविष्यति। अतः परं सर्वाः औपचारिकताः पूरयित्वा १५ जुलाई-दिनाङ्कपर्यन्तं बीपीएल-परिवाराणां सूची प्रकाशिता भविष्यति। सर्वकारेण स्पष्टीकृतं यत् पात्रपरिवारेभ्यः आवेदनं स्वीकृत्य ग्राम-खण्ड-मण्डलस्तरेषु तेषां सत्यापनं करिष्यते।

अन्तिमा बीपीएल-सूची १५ जुलाई-दिनाङ्कपर्यन्तं प्रकाशिता भविष्यति। सर्वकारेण निर्गतादेशानुसारं इदानीं बीपीएल-सूच्यै भूमिहीनाः परिवाराः अपि आवेदनं कर्तुं शक्ष्यन्ति। ग्रामीणविकासविभागेन एषः अपि निर्णयः स्वीकृतः यत् गतेषु सप्तसु चरणेषु केवलम् आयप्रमाणपत्रस्य अथवा अन्य-आवश्यकदस्तावेजानां समये उपलब्धत्वाभावात् चयनात् वञ्चिताः पात्राः परिवाराः अपि अस्मिन् अष्टमचरणे आवेदनस्य अवसरं प्राप्स्यन्ति। सर्वकारेण सम्बन्धिताः अधिकारिणः निर्धारितसमयसीमाभ्यन्तरे सम्पूर्णप्रक्रिया पारदर्शिरूपेण सम्पादयितुं निर्दिष्टाः।

**केवलं सर्वेक्षणे सम्मिश्रणमेव पात्रता न**

सर्वकारेण स्पष्टीकृतं यत् केवलम् आवेदनस्वीकारेण अथवा सर्वेक्षणे सम्मिश्रणमात्रेण कस्यापि परिवारस्य नाम बीपीएल-सूच्यां सम्मिलितं न मनिष्यते। अन्तिमचयनं निर्धारितसत्यापनप्रक्रियायाः सर्वकारस्य मार्गदर्शिकानां च आधारेण एव भविष्यति।

# 'चिट्टा' मादकद्रव्य-तस्कराणां ७० लक्षरूप्यकाणां सम्पत्तिः कुण्ठिता (सीज), विलासिता-यानेषु, ट्रक्-याने, कार-याने, सुवर्णे, वित्तकोषसंख्यासु च आरक्षकदलस्य प्रक्रमः




**हिमसंस्कृतवार्ताः — शिमला।** शिमला-आरक्षकदलेन (पुलिस) मादकद्रव्यतस्करी-विरोधि-अभियानस्य अन्तर्गतं तस्कराणां आर्थिकतन्त्रस्य उपरि महान् प्रहारं कृत्वा 'एन.डी.पी.एस.' (NDPS) अधिनियमस्य द्वयोः प्रकरणयोः प्रायः ७० लक्षरूप्यकाणां अवैधसम्पत्तिः कुण्ठिता (फ्रीज) कृता। आरक्षकदलस्य कथनं वर्तते यत् अधुना प्रक्रमः केवलं मादकद्रव्यतस्कराणां ग्रहणं (गिरफ्तारी) यावत् सीमितः न स्थास्यति, अपितु तस्करितः अर्जितानाम् अवैधसम्पत्तीनां परिचयं कृत्वा ताः नियमान्तर्गतं अधिग्रहीष्यन्ते। प्रथमं प्रकरणं ११ फरवरी २०२५ तमवर्षस्य अस्ति। रामपुरस्य 'डिटेक्शन सेल' इत्यनेन गुप्तसूचनायाः आधारेण किन्नौरनिवासिनः 'साहिल' इत्यस्य सम्मुखात् प्रायः ६ ग्रामपरिमितं 'चिट्टा' (हेरॉइन) इति मादकद्रव्यं प्राप्तं कृतम् आसीत्। अस्मिन् विषये रामपुर-आरक्षकस्थाने एन.डी.पी.एस. अधिनियमस्य २१ तमायाः धारायाः अन्तर्गतं प्रकरणालेखः कृतः। अन्वेषणकाले आरक्षकदलेन मादकद्रव्यापूर्तेः तन्त्रस्य पूर्वतन-परतन-सम्बन्धानां (बैकवर्ड और फॉरवर्ड लिंक) गहनान्वेषणं विहितम्, यस्यां गोविन्दसिंह-राकेशकुमार-मनमोहनसिंह-दीपक-राकेशादीनां अन्य-आरोपिसदस्यानां संलिप्तता सम्मुखम् आगता। सर्वे अपि एन.डी.पी.एस. अधिनियमस्य २९ तमायाः धारायाः अन्तर्गतं बन्दीकृताः। आरक्षकदलेन प्रकरणस्य आर्थिकान्वेषणकाले त्रयाणाम् आरोपिणाम् प्रायः ३२ लक्षरूप्यकाणां अवैधसम्पत्तिः चिह्निता। एतेषु विलासिता-यानानि (लग्जरी वाहन), ४४.१ ग्रामपरिमितं सुवर्णं, अन्याः सम्पत्तयश्च सम्भृताः सन्ति।
एताः सर्वाः नियमानुसारं कुण्ठिताः (फ्रीज) कृताः। द्वितीयं प्रकरणं 'चेतन चौहान' इति आरोपिणा सह सम्बद्धं वर्तते, यस्य विरोधे पूर्वमेव एन.डी.पी.एस. अधिनियमस्य द्वौ प्रकरणालेखौ पञ्जीकृतौ आस्ताम्। तस्य विरोधे निरोधात्मकप्रक्रमस्य प्रस्तावः सर्वकाराय प्रेषितः आसीत्। सर्वकारस्य अनुमत्याः परं सः २५ अप्रैल् २०२६ तमे दिनाङ्के चण्डीगढ़तः गृहीतः (बन्दीकृतः)। वर्तमानकाले सः कैथू-स्थिते मण्डल-उपकारागारे (जेल) बद्धः अस्ति। चेतनचौहानस्य आर्थिकान्वेषणकाले प्रायः ३८ लक्षरूप्यकाणाम् अवैधसम्पत्तेः प्रकटनं अभवत्। अस्याम् एकं ट्रकयानं, एकं कार-यानम्, ७४ ग्रामपरिमितं सुवर्णं, वित्तकोषसंख्याः, अन्याः वित्तीयसम्पत्तयश्च सम्मिलिताः सन्ति। वर्ष २०२६ इत्यस्य प्रथमेषु षट्सु मासेषु आर्थिकान्वेषणस्य आधारेण चतुर्षु प्रकरणेषु षण्णाम् आरोपिणाम् आहत्य १.८३ कोटिरूप्यकाणाम् अवैधसम्पत्तिः अधिग्रहीता अस्ति। शिमलायाः वरिष्ठ-आरक्षक-अधीक्षकः (SSP) गौरवसिंहः अवदत् यत् भविष्ये अपि मादकद्रव्यतस्कराणां विरोधे आर्थिकान्वेषणस्य अवैधसम्पत्तेः जप्तीकरणस्य च प्रक्रमः पूर्णकठोरतया सह निरन्तरं प्रचलति।

# एच.आर.टी.सी. इत्यस्य समूहे सम्मिलितानि १५० नूतनानि वैद्युतिक-बसयानानि, ऊना-हमीरपुर समेतेभ्यः ९ आगार-केन्द्रेभ्यः आबंटितानि



**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशस्य ग्रामीणक्षेत्रेष्वपि अधुना प्रदूषणमुक्तानि, हरितवर्णानि, विलासितापूर्णाणि विद्युत-बसयानानि (इलैक्ट्रिक बसें) धावन्त्यः दृश्यन्ते। हिमाचल-पथ-परिवहन-निगमस्य (HRTC) समूहे १५० नूतनानि वैद्युतिक-बसयानानि प्राप्ताणि सन्ति। परवाणू-क्षेत्रे आगमनात् परं निगमप्रबन्धकेन एतानि बसयानानि प्रदेशस्य ९ विभिन्नेषु आगार-केन्द्रेषु आबंटितानि। पूर्वम् एतानि विद्युत्-बसयानानि मुख्यरूपेण केवलं शिमला-मनाली-मण्डी-धर्मशाला सदृशेशु बृहन्नगरेषु एव सीमितानि आसन्, परन्तु अधुना प्रदेशस्य प्रत्येकस्मिन् आगार-केन्द्रे विद्युत्-बसयानानि उपलप्स्यन्ते, येन सामान्यजनेभ्यः श्रेष्ठस्य सुखदस्य च प्रवासस्य सुविधा प्राप्स्यते।

## कस्मै आगाराय कति ई-बसयानानि ?

परवाणू-स्थाने स्थितानां नूतनानां विद्युत्-बसयानानां मध्ये सर्वाधिकानि यानानि ऊना-हमीरपुर मण्डलाभ्यां प्रेषिताना अस्ति। निगमप्रबन्धकस्य आबंटनानुसारं ३५-३५ बसयानानि ऊना-हमीरपुरयोः, २० बसयानानि बिलासपुरे, १५-१५ बसयानानि नालागढे नाहने च, १०-१० बसयानानि देहरा-पालमपुरयोः तथा च ५-५ बसयानानि धर्मशाला-तारादेवी (शिमला) क्षेत्रेषु प्रेषितानि सन्ति। एतदतिरिच्य अन्येषु अपि केषुचित् डिपो-केन्द्रेषु १-२ बसयाने प्रेषिते।

## पी.डी.आई. (PDI) परीक्षणोत्तरं मार्गेषु धाविष्यन्ति बसयानानि

एच.आर.टी.सी. प्रबन्धकेन ज्ञापितं यत् डिपो-केन्द्रेषु बसानां प्रापणात् परं निगमस्याधिकारिणः तकनीकी-अभियन्तारश्च (इंजीनियर्स) एतासां बसयानानां पी.डी.आई. (प्री डिलीवरी इंस्पैक्शन - वितरणपूर्वपरीक्षणम्) विधास्यन्ति। एतस्मिन् तकनीकी-अन्वेषणे पूर्णे सति एतानि बसयानानि विभिन्नेषु मार्गेषु प्रचालयिष्यन्ते। आसां नूतनानां बसयानानां सम्भरणेन डिपो-केन्द्रेषु प्रचलन्ती बसयानानां न्यूनता दूरीभविष्यति तथा च बहुषु नूतनेषु मार्गेष्वपि बससेवा आरब्धुं शक्ष्यते।

## सद्यः एव आगमिष्यन्ति १४७ अन्यानि ई-बसयानानि

उल्लेखनीयं वर्तते यत् एच.आर.टी.सी. विभागेन आहत्य २९७ विद्युत्-बसयानानां क्रयणाय आदेशः दत्तः आसीत्, येषु १५० बसयानानि प्रदेशं प्राप्तानि सन्ति। निगमप्रबन्धकानुसारं, शिष्टाणि १४७ विद्युत्-बसयानानि अपि सद्यः एव हिमाचलं प्राप्स्यन्ति। ई-बसयानैः साकमेव प्रदेशे डीजल्-बसयानानां क्रयणप्रक्रिया अपि निरन्तरं प्रचलन्ती अस्ति।

## किं कथयन्ति एच.आर.टी.सी. इत्यस्य अधिकारिणः?

एच.आर.टी.सी. उपाध्यक्षेण अजयशर्मणा कथितं यत् प्रदेशे नूतनानां विद्युत्-बसयानानां आपूर्तिः (सप्लाई) निरन्तरं प्राप्नोति। अधुना यावत् आधुनिकसुविधाभिः युक्तानि प्रायः १५० नूतनानि वैद्युतिक-बसयानानि हिमाचलम् आगतानि सन्ति, यानि अग्रे डिपो-केन्द्रेभ्यः आबंटितानि। शिष्टाणि बसयानानि अपि सद्यः प्रदेशे आगमिष्यन्ति। नूतनानां बसयानानाम् आगमनस्य एषा प्रक्रिया सततम् अनुवर्तिता अस्ति।

# तांजे सांडूये भरी गया था भाखड़े रा पानी

याद करी कने दिल मेरा रोन्दा
कियाँ लिखिए बीते वक्ता री काहणी
नौ अगस्ता रा ई दिन था
तांजे सांडूये भरी गया था भाखड़े रा पाणी

घर बार छडी कने खुले चली पये थे
लोक सिरा पर चकी कने समान
हौलेयां हौलेयां पाणी चढ़ेया
डूबी गए अंगण द्वार कने डुबेया सांडू रा मदान

जियां जियां झील भरी
चढ़ेया भाखड़े रा पाणी
रुकणे रा नांव नी लैंदा था
आखीं ते बगदा छम छम पाणी

धौलरे रे मंदरा गे बैठी कने
असें देखी आखीं अपणी तबाई
ब्लॉसपुरा जो मिल्या विस्थापन रा तौफा
आज़ादी म्हारे किसी कम्मा नी आई

इसे झीले असां जो बड़े दर्द दिते
कुनिये बी एह दर्द कम नी कित्ते
टपरूये जोगी ज़मीन बी अई नी गठी
सारेयाँ ई असांरे लोऊ बड़े पित्ते

पुराणी पीढ़ी हुण मरी खपी गई
दिला रियाँ गलां किसजो समझाइये
कलेजे री पीड़ सैजे समझी सको
एहड़ा माणु हुण किता ते ल्याईये

किसी जो नी मिल्या कुछ बी
हुँदेयां जमीनें ऑस्टी दित्ते असें बणाई
इतने सालां ते मरी गए रडांदे
पर ब्लॉसपुरा री सुध किसी जो नी आई

**रवींद्र कुमार शर्मा,घुमारवीं**
**जिला बिलासपुर हि प्र**



# भट्टदेवविश्वविद्यालये संस्कृतकार्यशाला सम्पन्ना




**हिमसंस्कृतवार्ताः- नयनज्योतिशर्मा।** २८ जून २०२६ तमे दिने भट्टदेवविश्वविद्यालयस्य संस्कृतविभागस्य आयोजनेन संस्कृतभारती- नलबारीविभागस्य सहयोगेन च भट्टदेवविश्वविद्यालयप्राङ्गणे अस्मिन् वर्षे नवप्रकाशितस्य नवमकक्षायाः पाठ्यपुस्तकस्य समीक्षा कृता। सरलसंस्कृतभाषाप्रयोगस्य प्रवर्धनार्थं बक्सा-बजाली-बरपेटा-नलबारीजिलानां संस्कृतशिक्षकाणां कृते एकदिवसीया कार्यशाला आयोजिता। कार्यशालायाः शुभारम्भः भारतमातुः पुरतः दीपप्रज्वलनेन अभवत्। दीपप्रज्वलनं जालाह-शिक्षाखण्डस्य संसाधनव्यक्तिः अशोकशर्मा अकरोत्। स्वागतभाषणं भट्टदेवविश्वविद्यालयस्य संस्कृतविभागाध्यक्षया, संस्कृतभारत्याः बजाली- बरपेटाजिलाध्यक्षया डॉ. रश्मिदेव्या प्रदत्तम्। सरलसंस्कृतविषये व्याख्यानं संस्कृतविभागस्य सहप्राध्यापिका डॉ. रुणिमाशर्मा प्रस्तुतवती। ततः परं कार्यशालायाः मुख्यकार्यक्रमः सम्पन्नः। अस्यां कार्यशालायां नवमकक्षायाः पाठ्यपुस्तकस्य सम्पादनसमितेः सदस्यौ क्रमशः कुमारभास्करवर्म- संस्कृत- पुरातनविश्वविद्यालयस्य सहप्राध्यापकः, संस्कृतभारत्याः उत्तरासमप्रान्तस्य प्रशिक्षणप्रमुखः डॉ. छबीलाल उपाध्यायः, बगुरीहाटी- उच्चतर-माध्यमिक- विद्यालयस्य संस्कृतशिक्षयित्री ज्योतिस्मिता दास च उपस्थितौ आस्ताम्। सरलसंस्कृतविषये चर्चा नयनज्योतिशर्मा, कनकनाथेन च कृता। समग्रकार्यक्रमस्य सञ्चालनं संस्कृतभारती- नलबारीविभागस्य प्रमुखः हंसदासः, बजाली-बरपेटाजिलायाः संस्कृतभारत्याः प्रशिक्षणप्रमुखः टङ्केश्वरपाठकः च सम्यग्रूपेण अकुरुताम्। अस्यां कार्यशालायां बक्सा, बजाली (बरपेटा) तथा नलबारीजिलानाम् अनेकसर्वकारीय-व्यक्तिगत विद्यालयानां शिक्षकाः शिक्षिकाश्च उपस्थिताः आसन्। तदुपरि भट्टदेवविश्वविद्यालयस्य सहप्राध्यापकः डॉ. अम्बरीशः अध्यापक अपि उपस्थितः सन् कार्यशालायाः शोभां वर्धितवान्।

# यूरोप-महाद्वीपे अपि ग्रीष्मकालस्य हाहाकारः, फ्रान्स-देशे १००० जनानां मृत्युः; ब्रिटेन-जर्मनी-सदृशाः देशाः अपि तप्यन्ते




**हिमसंस्कृतवार्ता।** यूरोप-महाद्वीपः एतेषु दिनेषु कीर्तिमानभङ्गकारिण्याः उष्णलहर्याः (हीटवेव) प्रभावे अस्ति। फ्रान्स-देशे भीषणतापेन प्रायः १,००० अतिरिक्तानां जनानां मृत्युः अभवत्। स्वास्थ्यसंस्थया रविवासरे उक्तं यत् एताः मृत्यवः २४ जून-दिनाङ्कतः २७ जून-दिनाङ्कस्य मध्ये अभवन्। अतिरिक्तमृत्यूनाम् अर्थः अस्ति यत् गतेषु कतिपयेषु वर्षेषु जातानां सरासरी-मृत्यूनां तुलनया अस्मिन् वारे प्रायः १००० जनाः अधिकाः मृताः। तथापि सर्वकारः न तु पूर्वतनं न च अस्मान् समयस्य किमपि सटीकम् आकळनं दत्तवान्। अपरपक्षे, दिल्यां 'हीट इण्डेक्स' (ऊष्मा-सूचकाङ्कः) ५१.३ डिग्री सेल्सियस-परिमितं यावत् प्राप्तः, यदा तु वास्तविकं तापमानं केवलं ४१.३ डिग्री सेल्सियस आसीत्। एषः भेदः वायौ स्थितायाः आर्द्रायाः (नमी) कारणेन अस्ति। तत्रैव जर्मनी, स्पेन, ब्रिटेन, डेनमार्क, चेक-रिपब्लिक, इटली, स्विट्जरलैंड इत्यादिषु बहुषु देशेषु तापमानेन दशकानां पुरातनाः कीर्तिमन्तः भग्नाः। रविवासरे यूरोप-महाद्वीपस्य १६ देशेषु प्रायः १९.१ कोटि जनाः ३५ डिग्री सेल्सियस अथवा तस्मात् अधिकस्य तापमानस्य सम्मुखीकरणं कृतवन्तः। कुत्रचित् मार्गाः विलीयन्ते, कुत्रचित् विद्यालयाः पिहिताः, अन्यत्र च वनेषु भीषणः दावाग्निः प्रज्वलितः।

## ब्रिटेन-देशस्य इतिहासस्य प्रथमा 'रेड वार्निंग' (रक्तसचेतना)

ब्रिटेन-देशस्य इतिहासे प्रथमां वारं लगातारं दिनत्रयं यावत् 'रेड वार्निंग' (रक्त-सचेतना) प्रसारणीया अभवत्। ब्रिटेन-देशे जून-मासस्य ५० वर्षद्वयात् पुरातनः पूर्वतनः कीर्तिमानः अस्मिन् सप्ताहे दिनत्रयं भग्नः। दक्षिणी-इङ्ग्लैण्ड-देशे तापमानं ३६.४ डिग्री सेल्सियस-परिमितं प्राप्तम्, यत् अस्य जून-मासस्य नवीनः कीर्तिमानः अस्ति। ब्रिटेन-देशस्य इतिहासस्य सर्वोच्चं तापमानं ४०.३ डिग्री सेल्सियस अस्ति, यत् जुलाई २०२२ मध्ये अङ्कितम् आसीत्। मन्यते यत् एतत् अस्मिन् वर्षे भङ्क्तुं शक्यते।

## वेनेजुएला-देशे अद्यापि अष्टषष्टि-सहस्रं (६८,०००) जनाः निरुद्दिष्टाः, अद्य पुनः ५.६ तीव्रतायाः भूकम्पः; इदानीं यावत् १४३० जनानां मृत्युः

वेनेजुएला-देशे रविवासरे पुनः ५.६ तीव्रतायाः भूकम्पः अभवत्। 'यूरो-मेडिटेरेनियन सीस्मोलॉजिकल सेंटर' इत्यस्य अनुसारं भूकम्पस्य केन्द्रम् अरागुआ-तटस्य समीपे समुद्रे त्रिंशत् (३०) किलोमीटर-परिमितगाम्भीर्ये आसीत्। वेनेजुएला-देशे भूकम्पेन इदानीं यावत् सहस्राणां जनानां जीवनानि ग्रसितानि। विवरणानुसारम् अस्मिन् भूकम्पे इदानीं यावत् १४३० जनानां मृत्यूनां पुष्टिः अभवत्। तथापि एषा सङ्ख्या अतिमहती भवितुं शक्नोति। अधिकारिणाम् अनुसारं, परिवारैभिः रविवासरे प्रातः न्यूनतिन्यूनं ६८,९०० जनानां निरुद्दिष्टतायाः (लापता होने की) सूचना दत्ता। अद्यापि अवकरात् (मलबे से) शवानाम् उपरि शवाः निष्कास्यन्ते।



# "विनोदकणिका"

**आरक्षकः-** भवतः सर्वाणि कर्गजानि सम्यक् सन्ति, किन्तु तर्हि २००० (द्विसहस्रं) द्रव्यदण्डं प्रदातव्यम्।
**यानचालकः-** सर्वाणि कर्गजानि सम्यक् अस्ति तर्हि द्रव्यदण्डं किमर्थम्?
**आरक्षकः-** भवान् सर्वाणि कर्गजानि पालिथीन स्यूते (अनम्य स्यूते) रक्षितम् खलु? इदानीम् पॉलीथीन प्रतिबन्धितम् अस्ति। 😅😮😂🤣

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**


हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अपि त्वया प्रथमा विचित्रा वार्ता श्रुता?
विश्वस्पर्धायाः क्रीडकाः परग्रहवासिभिः अपहृताः भविष्यन्ति इति कयाचित् स्वप्नदर्शिन्या कथितम्, किन्तु क्रीडायां किमपि न वृत्तम्!
**काव्या-** नमस्ते नन्दिनि। आम्, मया तत् स्वप्नवृत्तं पठितम्। क्रीडकानां न कोऽपि अपहारः कृतः। इदानीं द्वितीयं वृत्तं शृणु। कश्चित् बिडालः क्रीडाविजयेभ्यः पूर्वमेव दर्शनं कृतवान् अस्ति, येन मानवतज्ज्ञाः अपि पराजिताः!
**नन्दिनी-** अहो, सः बिडालः तु अतीव चतुरः! तेन तु सर्वे विस्मापिताः। अस्तु, तृतीयं वृत्तं शृणु। कस्यचित् शिशोः लिङ्गप्रकाशनाय केचन कपोताः नीलवर्णेन रञ्जिताः। एतेन वन्यजीवरक्षकाणां महती चिन्ता जनिता।
**काव्या-** सत्यम्, मानवानां मनोरञ्जनेन निर्दोषाः पक्षिणः पीडिताः। एतत् कष्टकरं वृत्तम्। अधुना चतुर्थं वृत्तं पश्य। आङ्ग्लदेशस्य कश्चित् कृषकः स्वक्षेत्रे पुनः सस्यमण्डलं दृष्ट्वा अतीव खिन्नः जातः। सः चतुर्थवारं तादृशं चित्रं दृष्टवान् अस्ति!
**नन्दिनी-** अहो! वारं वारं सस्यविनाशः तु कृषकाय महान् क्लेशः एव। अद्यतन्यः सर्वाः विचित्राः वार्ताः अस्माभिः चर्चिताः। कार्यक्रमस्य समाप्तिः इदानीं कृता। पुनर्मिलिष्यामः!